श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीमद्वेङ्कटाध्वरि विरचितम्

# ॥ श्रीलक्ष्मीसहस्रम् ॥

## ॥ चित्रस्तबकः ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ चित्रस्तबकः ॥

कमलायतनां चित्ते कलये यत्पदाम्बुजम्।
चिरं विबुधसन्मौळि चित्रस्तबक भूषितम्॥ १॥

वेदानि सर्वशास्त्राणि विभाव्य भवतीं रमे।
दास्यं यस्यास्तवोपैति देवि साऽपि सरस्वती॥ २॥

कमले देवदेवस्य महिषि त्वं स्तुतक्रमे।
विमले देवि देह्यस्य महितत्वं नतस्य मे॥ ३॥

पाहि देवि कलशोदधेस्सुते
देहि पापविलयं दयानिधे।
शेषशायिदयिते तमोमुषं
शेमुषीं कलय नः सुशोभनाम्॥ ४॥

संश्रितानवितुमास्थया दया
सारिणीह दिगधीशसेविता।
स्वप्रियस्य कलयन्त्युरः पदं
सम्पदं दिशतु सा हरिप्रिया॥ ५॥

श्रीरशेषजगदार्तिहारिणी
शेषशैलतटशेखरायिता।
राजसे जननि रक्षणाय नः
सागरेन्द्रतनये सदातनी॥ ६॥

हरेः प्रिये भगवती हृतसंश्रितसाध्वसा।
अन्वहं क्रियमाणानामंहसां संहतीरयात्॥ ७॥

www.prapatti.com

पायान्मामुरसावितश्रियमुमाराध्यां प्रपद्येतमां
    का वा न स्थिरमश्नुते शमधनोऽप्यालोकितो जातुचित्।
वेदान्तैर्विनुताङ्घ्रये न किमुत श्रेयोनतिं तन्वतां
    सेवामो रचयामि मानस सदा भक्त्यावहावादरम्॥ ८ ॥

कालीनानन नालीका राधिता हि हिताधिरा।
मायासाममसायामा कापि दीप्रप्रदीपिका॥ ९ ॥

सा रयादरिहाख्याऽसौ सौख्याहारि दयारसा।
मेय काय धरा माता तामाराधय काय मे॥ १० ॥

कारिताभिमता चित्ता वासे हारितमा रमा।
मारमातरिहासेवात्ता चित्तामभितारिका॥ ११ ॥

कापिमा सरसा सा त्राभिलापाकरनामका।
कायिनारिहरासेव्याग्र्य नावास्तुतिवाचया॥ १२ ॥

याच वाति स्तुवानाग्र्य व्यासेराहरिनायिका।
कामनारकपालाभि त्रासासार समापिका॥ १३ ॥

अच्छभावा फणिशये जगन्नाथे झषाङ्कदा।
आरूढाघखलापीडो व्याटऋद्धिं हि सौति सा॥ १४ ॥

दार्ढ्यदा मम हेदेहे सात्रासाललमेऽन्ति मे।
खेदिखेऽहहयानेया तार्क्ष्येताद्यद्यतामिता॥ १५ ॥

मयि ते पदभक्तेऽस्मिन् प्रसीद कमले हिते।
तेजसा दह शक्तेऽद्य क्षिप्रमुद्यदघं मम॥ १६ ॥

भजेमहि हरेः कान्तां कारुण्यरसपूरिताम्।
भवामयहरां कामं कार्पण्य त्रासहारिणीम्॥ १७ ॥

मावतादत्र परमा मारपस्वाक्षिकालिमा।
मालिकाभिस्समेतामा माता मे विधुतावमा॥ १८ ॥



www.prapatti.com

क्षमासमागमाऽभीमा रामाणामादिमाऽसमा।
क्षमा क्षेमा रमारामा प्रमासीमासुमातिमा॥ १९ ॥

दयासारासाहितासा याशु भामतिपालिता।
साभाकारा भाव पाहि रामरामा विभाति सा॥ २० ॥

समुद्रजोन्नतान् कुर्यात् सा नः संसारतारिका।
समुद्रजोन्वितान् क्रौर्यात् पुनस्त्रासान्वितारिका॥ २१ ॥

इन्दिरा भासुरा पद्म मन्दिराप धरापहा।
हापराधहरा दृष्ट्या सापराभासुरादृता॥ २२ ॥

काकाननदे देवि विपापाहह भूभू-
    रारादरारा ममनानाममहेहे।
यायाममखेखेदद नानाघघनाना
    त्वं त्वं गगदादाववनीनीततमामा॥ २३ ॥

मारमाता हि भात्युग्र रविमाहित भाग्रमा।
मानिता विधिभीतानां हृतदुर्गत्युरुश्रमा॥ २४ ॥

पामराज्ञानतरिका च्छायायासंमतातुला।
तापनोदनहासैका रमानतसुराऽवतात्॥ २५ ॥

पापसंहारिका रातु मनोज्ञानतसंमता।
ज्ञानपामादयाज्ञाता च्छामायापापरादरा॥ २६ ॥

रमासदादासमार मानदाननदानमा।
सदाशयायाशदास दानयागगयानदा॥ २७ ॥

समर्थयस्व सकल क्षितिस्थितिविनिर्मितिम्।
मुमुक्षुद्युद्रुरुमुत्समुद्रदुहितः स्वयम्॥ २८ ॥

पारावाराज्जाता माता
    पायात्पायात्त्रासाद्दासान्।

साराकाराजास्याख्याता
    साराकारा नागाद्व्याप्ता॥ २९ ॥

रमे रामे मुरारातेः मारमातरतीतरे।
ततं तिमिरमेतत्तु मतितोऽतितरामि ते॥ ३० ॥

काले किलालौकिकैक कोलकालालके लल।
कलिका काल कल्लोला कुललोकालिलालिका॥ ३१ ॥

ररोररेररुरो रुरूरुरुरुरोररे।
रेरेरारेराररे रेरारिरिरारिरा॥ ३२ ॥

मामा ममा ममे माम्मा मामू मामे मामा ममे।
मामा मेमि मिमे माम ममो मामा ममा मिमाम्॥ ३३ ॥

मामान मामान मामा मान मान नमा नमा।
नमा नमा मान मान मान मान नमा नमा॥ ३४ ॥

माया माया माया माया माया माया माया माया।
माया माया माया माया माया माया माया माया॥ ३५ ॥

मासारक्षापरस्या वनगगगनवत्याघुणस्वाशहेमा
    माहेशस्वास्थ्य नाकादि पददपदित्ये धयन्तीहतामा।
माताहन्तीति सूतेरचित ततचिरस्थानुकूल्यावनामा
    मानावल्या प्रकृष्टं परमममरपप्रीतिरक्षारसा मा॥ ३६ ॥

वक्त्रावेक्षित कर्मकुक्षितिभुजां नोसर्वदायद्दृशां
    पत्यङ्कस्थितिमत्र विन्दति भयं साहर्तुमृज्वर्थिनाम्।
भिक्षाटस्वमलात्मदुर्गतिहराजस्रं मता नः परा
    राजीवावसथा पराधिभिदुरा शान्तात्मनां भासुरा॥ ३७ ॥

आर्तं वेदयमीड्यसारमहिम श्रीवत्सगौकः स्पृश
    त्रेताङ्कस्थिरमान्तनु त्वममलाप्तातङ्गिरिं वीन्द्रपा।

यत्राटानलसप्रताप मचलद्दासे हरीन्दुस्स्थले
    वन्द्यार्यव्रजकल्पक क्रमतया ज्ञानप्रदानाऽसि ना॥ ३८ ॥

वेषङ्कलिविकटाशुभहरमार्यत्राणदं वृषाद्रौ त्वम्।
श्रीरयसे करुणारस पालितलोका हरस्यजस्रमकम्॥ ३९ ॥

जयति सा जलधीश्वरकन्यका
    भवभयातुरमादृशपालिनी।
विकसिता रमणस्य कृपावतो
    मनसि पालयतो व्यसनान्ननन्तम्॥ ४० ॥

कायभासा चलद्विश्वमुत्कल्पिका
    देवता या स्फुरत्यादृता पावनी।
लोकमाता मम त्रस्यतः पापतो
    ज्ञानमापादयत्वव्यया नाथितम्॥ ४१ ॥

विदिता निगमे विषमेषुतनौ
    रसिके निरता वृषभाद्रिविभौ।
मम दास्यवतो विमलाऽवसथे
    कृपया दुरितं सहसे कमले॥ ४२ ॥

समस्तसेव्या सदरिक्षयादिकृत्
    लसद्विलासा विभवप्रदा मम।
रविप्रभा त्वं वृषरक्षिके स्फुर-
    स्तुतक्रमे देवि जगद्धिता भुवि॥ ४३ ॥

नाशिता पत्तिना नाकसद्मादिना
    नादिनेत्राऽधुना नाधिनीं विष्णुना।
नापचारादिना नामयात् सज्जनान्
    नावितुं मां विना नाश्रयान्याधना॥ ४४ ॥

भक्तचिह्नासुधा नित्यमिष्टक्रिया
    कारिका कारिका कारिका कारिका।

साशुभा यासि मे त्वं समृद्धिं रमे
    नामया नामया नामया नामया॥ ४५ ॥

गृहाणि नस्त्वं परमे रमे रमे
    ह्यपाकृतापावधिकाधिकाधिका।
जडानपि त्वं नयनाय नायना-
    दहो नृकर्णोत्सवदावदावदा॥ ४६ ॥

सा मा मा पातु दयया शयदा भास्वरालका।
दासावनी वरमहा भाविता नारदादिना॥ ४७ ॥

क्षेमातापाप्तिदहा या कमला भासुरालोका।
सासावानीतरसा हा भुवि लूनापदाताना॥ ४८ ॥

आदित्यैरर्च्यैताग्र्याभा धीमज्जीवस्तावह्लादा।
सा लक्ष्मीः स्वश्रीदा क्लेशग्लायद्यातुस्तोमावासा॥ ४९ ॥

मास वासरसाराववरा सारसवासमा।
मासवासरसाराव वरासारस वाऽसमा॥ ५० ॥

पद्मे वासोऽप्यहह सुमनः कोमलं क्लान्तिकृत्ते
    पद्मेवासोऽप्यतिमृदुतनोः साहसेनेति सिद्धे।
आयासि त्वं न कथमधुना चित्रकूटाश्मचारात्
    आयासित्वं तदिह कृपया सह्यतां साहसं मे॥ ५१ ॥

नियतं नमांसि विदधीमहि ते
    निगम प्रतीप मनसा महिते।
जगदम्ब जम्भरिपुणा महिते
    मुनयो जपन्ति तव नाम हि ते॥ ५२ ॥

भयानकमलालयं अतिभयेन जिह्वामिमां
    स्तवैर्न कमलालयं हुतभुगुष्णया तृष्णया।
भजेय कमलालयं त्वहमितः परं तन्महः
    धुनाधि कमलालयं नहि भजन्ति यत्संश्रिताः॥ ५३ ॥

हयरूपधरो य आसमस्ते
    श्रितलोकः कलयाऽमुना समस्ते।
जुषते धिषणाविकासमस्ते
    दुरिते देवि भवद् दृशा समस्ते॥ ५४ ॥

जननि तडित्प्रभवपुषे
    प्रभवपुषे संपदां नमस्तुभ्यम्।
वषित वृषाचलविभवे
    चलविभवे मा स्म मां प्रवर्तयेथा॥ ५५ ॥

हृतसुखवारिजनिलयं
    वारिजनिलयं रमाभिधं ज्योतिः।
हृदय सदा नम महितं
    नममहितं तदितरेषु पतनं ते॥ ५६ ॥

प्रपदन भारत्यागो भारत्यागोन्मुखस्य मे सोढ्वा।
कमले रक्षसि कलितो रक्षसि कलितोग्र दुष्कृतेऽभयदा॥ ५७ ॥

कृतहिंसारं भान्तं सारम्भान्तं रमे तवापाङ्गम्।
अर्थित रक्षोपाये रक्षोपाये पटो निधेहि मयि॥ ५८ ॥

जनमनुकम्पारम्या कं पारम्याद्रमे न मोदयसि।
कृतहितयाचित्राणा या चित्राणां निधिस्त्वमखिलानाम्॥ ५९ ॥

॥ इति श्रीमद्वेङ्कटाध्वरिविरचिते श्रीलक्ष्मीसहस्रे चित्रस्तबकः ॥

www.prapatti.com